National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 194-196
© 2024 NJHSR
www.sanskritarticle.com

**Bapi Sahoo**
M.A., WB SET, NET & JRF,
Research Scholar,
Midanapore College (Autonomous)
West Bengal

**Correspondence:**
**Bapi Sahoo**
M.A., WB SET, NET & JRF,
Research Scholar,
Midanapore College (Autonomous)
West Bengal

# 'चादयोऽसत्त्वे' इति सूत्रे असत्त्वशब्दविमर्शः

**Bapi Sahoo**

**कूटशब्दाः (Key -Words) –** निपातसंज्ञा, असत्त्वे, सत्त्वम्, चादयः, प्रसज्यप्रतिषेधः, पर्युदासः।

**शोधसारः (Abstract) -**

व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथकीकृत्य उपस्थाप्यन्ते इति व्याकरणम्। सूत्रमाध्यमेन शब्दानां साधुत्वविधानं व्याकरणस्य प्रमुखम् उद्देश्यम्। पाणिनीयं व्याकरणं सूत्रोपक्रमेण तदीयं तात्पर्यं प्रतिपाद्य अनन्यं स्थानम् अधिकरोति। पाणिनेः अष्टाध्याय्यां संज्ञा-परिभाषादिसूत्रभेदकल्पनेन सूत्राणामुपस्थापनं विधाय तद्रहस्यं विविच्यते। सूत्राणां तात्पर्यसाधनाय वृद्धि-गुण-सम्प्रसारण-टि-घु-घ-निष्ठादीनि बहूनि पारिभाषिकवचनानि उपकल्पितानि विद्यन्ते। तत्र अव्यय-निपात-प्रगृह्य-लोप-कर्मप्रवचनीय-अपृक्त-गत्यादीनि पारिभाषिकपदानि प्रयुज्य तत्तद्संज्ञा-विधानेन नूतनानि कौशलानि आविष्कृतानि जायन्ते। अत्र विशेषस्तु कारकसंज्ञाधिकार-एकसंज्ञाधिकार-निपातसंज्ञाधिकार-कर्मप्रसंज्ञाधिकार-समाससंज्ञाधिकारादिमाध्यमेन सूत्राणि सन्निवेश्य तत्तत्सूत्राणां तत्तन्निर्दिष्टानि कार्याणि विधीयन्ते। प्रक्रियानिर्वहणार्थं पदानां साधुत्वविवेचनार्थं च प्रतिपादितेषु एतेषु कौशलविशेषेषु निपातसंज्ञाधिकारः अन्यतमः। अष्टाध्याय्यां निपातसंज्ञाधिकारे 'प्राग्रीश्वरान्निपाताः'[1] इत्यतः आरभ्य 'अधिरीश्वरे'[2] इति सूत्रं यावत् प्रायतः द्विचत्वारिंशत् सूत्राणि उपपादितानि विद्यन्ते। तेषु सूत्रेषु 'चादयोऽसत्त्वे'[3] इति सूत्रम् अन्यतमम्। असत्त्वे अर्थे (अद्रव्यार्थे) चादयः निपातसंज्ञां लभन्ते इति सूत्रतात्पर्यम्। यदुक्तं दीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां संज्ञा-परिभाषाप्रकरणे- "अद्रव्यार्थाश्चादयः निपातसंज्ञाः स्युः" इति। असत्त्वमिति पदं न सत्त्वमिति विग्रहे नञ्-तत्पुरुषसमासे निष्पद्यते। सत्त्वमिति शब्दोऽयं द्रव्यचाची। अतः असत्त्वं नाम अद्रव्यम् द्रव्यभिन्नमित्यर्थः। यदुक्तं महाभाष्यस्य टीकाकारेण नागेशेन- "असत्त्वे इति पर्युदासो लाघवात् इति, विशेष्यतया द्रव्यभिन्नार्थाः इत्यर्थः[4]। "न सत्त्वम् असत्त्वम् अद्रव्यम्, तत्र वाचकतया विद्यमानाश्चादयः निपातसंज्ञकाः स्युरित्यर्थः" इति बालमनोरमाकर्त्तुः अभिमतम्। पुनः 'असत्त्व' इति शब्दस्य प्रयोजनीयतां प्रतिपाद्य वासुदेवदीक्षितेन कथितम्- "असत्त्वे किम्? छागः पशुः। चादौ पठितस्यापि पशुशब्दस्य अत्र द्रव्यवाचित्वान्न निपातत्वम्, इह तु स्यादेव पुष्टं पशु मन्यते। इह पशु इति सम्यगर्थे"[5]। इत्थम् अस्मिन् सूत्रे नञ्-विशिष्टस्य असत्त्वशब्दस्य अर्थनिरूपणप्रसङ्गे प्रयोजनीयतानिरूपणप्रसङ्गे च यानि तत्त्वानि प्रदर्शितानि, तान्येव आकल्य महाभाष्य-काशिका-न्यास-शब्दकौस्तुभ-पदमञ्जरी-बालमनोरमा-तत्त्वबोधिन्यादिषु ग्रन्थेषु प्रतिपादितानि तथ्यानि च विविच्य समीक्ष्यात्मकेन मार्गेण मदीयः शोधप्रबन्धः अत्र विकसितः।

अष्टाध्याय्यां प्रतिपादितेषु निपातसंज्ञाविधायकेषु सूत्रेषु 'चादयोऽसत्त्वे' इति सूत्रम् अन्यतमम्। अनेन सूत्रेण निपातसंज्ञां विधीयते। अस्मिन् सूत्रे चादयः असत्त्वे चेति द्वे पदे स्तः। 'प्राग्रीश्वरान्निपाताः' इति सूत्रात् प्राक् निपाताः इति पदद्वयम् अनुवर्तते। सत्त्वम्=द्रव्यम्। असत्त्वेऽर्थे चादयः निपातसंज्ञकाः स्युरिति सूत्रस्यास्य अर्थः। यदुक्तं शब्दकौस्तुभे दीक्षितेन- 'चादयो निपातसंज्ञाः स्युः न तु द्रव्ये'[6]।

सूत्रेऽस्मिन् प्रयुज्यमानस्य असत्त्वशब्दस्य अर्थनिरूपणावसरे शास्त्र-कारेषु बहूनि मतानि परिलक्ष्यन्ते। असत्त्वशब्दोऽयं न सत्त्वमिति विग्रहे नञि-समासे निष्पद्यते। सत्त्वशब्दः द्रव्यवाचकः। जातिगुणक्रियाणां विशेषणभावेन यत्रान्वयो भवति तदेव सत्त्वम् इत्युच्यते। जातिगुणक्रियाणाञ्च विशेषणतया अन्वयः द्रव्ये भवति, अतः सत्त्वं द्रव्यं भवति- 'द्रव्यासुव्यवसायेषु सत्त्वमित्यमरः'। 'लिङ्गसंख्याकारकान्वितं द्रव्यमिति' वासुदेवदीक्षितः। शब्दकौस्तु-भेऽपि सत्त्वशब्दः द्रव्यार्थे एव प्रयुज्यते। यदुक्तं तत्र-

**"वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।**

**द्रव्यमित्युच्यते सोऽर्थो भेदत्वेन विवक्षितः"[7]।।**

भगवता पतञ्जलिना अपि सत्त्वशब्दस्य द्रव्यरूपार्थं स्वीकृत्य महाभाष्ये उक्तम् – "अयं सत्त्वशब्दः अस्त्येव द्रव्यपदार्थकः। तद्यथा- सत्त्वमयं ब्राह्मणः सत्त्वमियं ब्राह्मणीति। अस्ति क्रियापदार्थकः सद्भावः सत्त्वमिति। कस्येदं ग्रहणम्? द्रव्यपदार्थकस्य। कुत एतत् ? एवं कृत्वा विधिः सिद्धो भवति, प्रतिषेधश्च"[8]।

महाभाष्यस्य व्याख्यानमिदं पाथेयीकृत्य टीकाकाराभ्यां कैयट-नागेशाभ्यां सत्त्वशब्देन द्रव्यमिति अर्थः तदीयायां टीकायां प्रतिपादितः। यदुक्तं कैयटेन प्रदीपटीकायाम्-

"अर्थद्वयेऽपि सत्त्वशब्दस्य प्रयोगदर्शनाद्विशेषावगतौ प्रमाणानुप-लम्भात्प्रश्नः। तत्र सीदन्त्यस्मिन् जातिगुणक्रिया इति सत्त्वं द्रव्यमुच्यते। यदा तु सतो भावः सत्त्वमिति तद्साध्यमानतया क्रियारूपापन्ना सत्ता सत्त्वशब्देनोच्यते। यदि सत्त्वशब्देन सत्तोच्यते तदा प्रतिषेधोऽनर्थकः स्यात्। न चादिषु सत्तावाची कश्चिच्छब्दोऽस्ति यदर्थो निषेधः स्यात्। पशुर्वै पुरुष इत्यत्र च निपातसंज्ञा स्यात्। चाद्यनुकरणानां चः पठितो हिर्यस्मादर्थ इत्यादावपि विधिनिषेधौ यथाभिमतविषं न व्यवतिष्ठेयाताम् द्रव्यग्रहणे तु व्यवतिष्ठेते। द्रव्यशब्देन चात्र सिद्धरूपं वस्त्वभिधीयते"[9]।

नागेशेनाऽपि तदेव तथ्यं प्रतिपाद्य सत्त्वशब्देन "सीदन्त्यस्मिन्निति विशेषणत्वेनावतिष्ठन्तेऽस्मिन्नित्यर्थः। वस्तुतःसाध्यमानावस्थः क्रिया-रूपापन्नो योऽर्थः सत्तारूपः स सत्त्वपदेनोच्यत इत्यर्थः प्रतिपादितः। सत्त्वं च लिङ्गसंख्याकारकान्वयित्वेन सर्वनामपरामर्शयोग्यत्वेन वा"[10]।

विषयस्यास्य अनुशीलनेन प्रतिभाति यत् सत्त्वशब्दः लिङ्गसंख्याकारकान्वितस्य द्रव्यस्य वाचकत्वेन प्रयुज्यते। न सत्त्वम् असत्त्वम्। एवम् असत्त्वशब्दे नञ्समासः अस्ति। नञः द्वौ अर्थौ भवतः- पर्युदासः प्रसज्यश्च। उभययोर्मध्ये असत्त्वशब्दे पर्युदासो भवति, लाघवात्। यदुक्तं नागेशेन- 'असत्त्वे इति पर्युदायो लाघवात् इति'। अत्र तात्पर्यं यत्-प्रसज्यप्रतिषेधे नञः अन्वयः क्रियया सह भवति। यथा 'अनचि च'[11] इत्यत्र प्रसज्यप्रतिषेधः स्वीक्रियते, तत्र नञः अन्वयः भवतीति क्रियया भवति- अचि परे न भवति। तदेवं नञः समासस्तु अचि इत्यनेन समम्, अन्वयस्तु क्रियया सह भवतीति असमर्थसमासकल्पना कर्तव्या भवतीति प्रथमं गौरवम्। क्रियाऽध्याहारश्च कर्तव्यो भवतीति द्वितीयं गौरवम्। वाक्यभेदश्च भवति। अतः प्रसज्यप्रतिषेधे गौरवं भवति। पर्युदासे अर्थे तु एतन्न न कर्तव्यं भवति। अतः लाघवात् असत्त्वशब्दे वर्तमानो नञ् पर्युदासार्थकोऽस्ति। पर्युदासे अर्थे वाक्यभेदस्य कल्पना नैव भवति, क्रियायाः अध्याहारः न क्रियते, तथा प्राप्तस्य अर्थस्य बाधनमपि न भवति। अतः अस्मिन् पक्षे लाघवो भवति। पर्युदासपक्षे च तद्भिन्नतत्सदृशः अर्थो भवति।

पर्युदासपक्षे स्वीकरणे तु एका शङ्का समुद्भवति। विशेषेण जनानां मनोरथान् प्राति=पूरयति इत्यर्थे (विप्रातीति विप्रः) व्युपसर्गपूर्वकात् प्रा-पूरणे इत्यस्माद्धातोः 'आतश्चोपसर्गे'[12] इति सूत्रेण क-प्रत्यये कृते 'विप्र' इति शब्दः सिद्ध्यति। विप्र-शब्दे वर्तमानः प्रशब्दः पूरणकर्त्तुः बोधकोऽस्ति अर्थात् कर्तृवाचकः अस्ति। कर्तृवाचकतया सत्त्ववाचकः सम्पन्नः। किन्तु क्रियामिश्रितं सत्त्वं तस्मिन् भवति, विशुद्धसत्त्वं तु तत्र नास्ति। द्रव्यमात्रवाचकात् क्रियाद्रव्यसमुदायवाचकस्य भेदो भवति। अतः अद्रव्यार्थकत्वात् अत्र प्र-शब्दस्य 'स्वरादिनिपातमव्ययम्'[13] इति सूत्रेण अव्ययसंज्ञाभावात् दोषो समुदेति। तथाहि उक्तं महाभाष्यकारेण-

"किं पुनरयं पर्युदासः यदन्यत्सत्त्ववचनादिति, आहोस्वित्प्रसज्यायं प्रतिषेधः सत्त्ववचने नेति? किं चातः? यदि पर्युदासः विप्र इत्यत्रापि प्राप्नोति क्रियाद्रव्यवचनोऽयं संघातः। द्रव्यादन्यश्च विधिनाश्रियते। अस्ति च प्रादिभिः सामान्यमिति कृत्वा तदन्तविधिना निपातसंज्ञा प्राप्नोति"[14]।

**उक्तं च प्रदीपटीकायाम्-**

"विप्रातीति विप्रः आतश्चोपसर्गे इति क-प्रत्ययान्तः। क्रियोपसर्जनद्रव्यवाचित्वात् केवलाद् द्रव्यात् क्रियाद्रव्यसमुदाय-स्यान्यत्वाद्द्रव्यादन्यस्मिन् अर्थे वर्तते। विशेष्यासन्निधानात्कथं तदन्तविधिः। एवं तर्ह्ययमर्थः-निपातस्य संज्ञा निपातसंज्ञा सा चाव्ययसंज्ञा। तस्यां चास्ति तदन्तविधिः प्रयोजनं सर्वनामा-व्ययसंज्ञायाम् इति। तत्र विप्रशब्दे प्रशब्दस्य निपातसंज्ञायां सत्यां यथा परमोच्चैरिति स्वराद्यन्तस्याव्ययसंज्ञा भवति, एवं निपातान्तस्यापि स्यात्। ततो लुक् प्रसज्यते।विप्रकम्बल इत्यत्र च निपातान्तस्य पूर्वपदप्रकृतिस्वरः स्यात्"[15]।

**शब्दकौस्तुभे दीक्षितेनापि कथितम्-**

"प्रसज्यप्रतिषेधः किम्? वातीति वाः, विप्रातीति विप्रः। इह क्रियाविशिष्टद्रव्यवाचकतया क्रियायाश्चासत्त्वरूपत्वान्निपातता स्यात्। ततश्च विप्रशब्दस्याव्ययसंज्ञा स्यात्"[16]।

पर्युदासपक्षे जायमनस्य दोषस्य निराकरणाय भाष्यकारः अत्र प्रसज्यप्रतिषेधं स्वीचकार। तदुक्तं भाष्ये- अथ प्रसज्यप्रतिषेधः न दोषो

भवति। यथा न दोषास्तथास्तु। असत्त्वे इत्यत्र प्रसज्यप्रतिषेधस्वीकारे नैव दोषः जायते। यतोहि पूरणक्रियाकर्तृवाचकतया प्रशब्दस्य विशेष्यतया द्रव्यवाचकत्वेन निपातसंज्ञा न भवतीति भाष्याशयः। नागेशोऽपि प्रस्तौति- "विशेष्यतया द्रव्यभिन्नार्था इत्यर्थः। तेन क्रियाविशिष्टद्रव्यवाचिनां विप्रादिघटकप्रादीनां न"[17]।

पुनः सूत्रेऽस्मिन् असत्त्वे इति पदस्य प्रयोजनं प्रतिपाद्य बालमनोरमाटीकीयां वासुदेवदीक्षितेन उक्तम्- "असत्त्वे किम्? छागः पशुः। चादौ पठितस्यापि पशुशब्दस्य अत्र द्रव्यवाचित्वान्न निपातत्वम्। इह तु स्यादेव पुष्टं पशु मन्यते। इह पशु इति सम्यगर्थे"। उक्तश्च ज्ञानेन्द्रसरस्वतिना तत्त्वबोधनीटीकीयाम्- "अद्रव्यार्थाः किम्? पशुः। लिङ्गसंख्यान्वितं द्रव्यम्। इह तु स्यादेव लोधं नयन्ति पशु मन्यमानाः। पशु इति सम्यगर्थे"[18]।

अत्र 'असत्त्व' इति शब्दस्य पर्यालोचनावसरे शास्त्रकारैः यानि यानि तथ्यानि उदाहरणमाध्यमेन प्रतिपादितानि, तेषां तथ्यानां विमर्शेन एतद् वक्तुं शक्यते यत्- न सत्त्वम् असत्त्वम् इत्यत्र नञः प्रसज्यप्रतिषेधरूपार्थः शास्त्रकारैः सिद्धान्तितः। तत्र 'अथ प्रसज्यप्रतिषेधः न दोषो भवति, यथा न दोषास्तथास्तु' इति भाष्यवचनमेव प्रमाणम्। जयादित्य-वामनाभ्यामपि काशिकायां तदेव तथ्यं प्रतिपादितम्- 'चादयो निपातसंज्ञाः भवन्ति, न चेत्सत्त्वे वर्तन्ते। प्रसज्यप्रतिषेधोऽयम्'[19] इति। अतः द्रव्यभिन्नार्थवतां चादीनां निपातसंज्ञा भवतीति फलितोऽर्थः।

**सहायकग्रन्थसूची-**


1.अष्टाध्यायीसूत्रपाठः, पुष्पा-दीक्षितः, ज्ञानभारती पब्लिकेशन्स, दिल्ली, 20009

2.वैयाकरणसिद्धान्तकौमुदी (कारकप्रकरणान्ता), लेखकः- भट्टोजी-दीक्षितः, सम्पादकौ- गिरिधरशर्मा-चतुर्वेदः परमेश्वरनन्दशर्मा च, मोतीलाल बनारसीदास, वराणसी-221001, 2010

3.वैयाकरणसिद्धान्तकौमुदी, लेखकः- भट्टोजीदीक्षितः सम्पा. श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी-221001, 2014

4.शब्दकौस्तुभः, लेखकः- भट्टोजीदीक्षितः, सम्पादकौ- विन्ध्येश्वर-प्रसाद-द्विवेदी गणपतिशास्त्री-मोकाटे च, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-221001, 2010

5. व्याकरणमहाभाष्यम्, पतञ्जलिः, सम्पा. श्री भार्गव शास्त्री जोशी, चौखम्बा विद्याभवन, वाराणसी-221001, 2014


**पादटीका-**

[1]पा.सू.-1.4.56
[2]पा.सू.-1.4.97
[3]पा.सू.1.4.57
[4]पा.सू.1.4.57, म.भा.पृ.291
[5]पा.सू.-1.4.57 द्रष्टव्या बालमनोरमाटीका, पृ. 35
[6]शब्दकौस्तुभः, पृ.-142
[7]तत्रैव. पृ.-140
[8]म.भा.पृ.292
[9]तत्रैव. द्रष्टव्या प्रदीपटीका
[10] तत्रैव. द्रष्टव्या उद्योतटीका
[11] पा.सू.8.4.47
[12] पा.सू.-3.1.136
[13] पा.सू.-1.1.37
[14] म.भा.पृ.293
[15] तत्रैव. द्रष्टव्या प्रदीपटीका
[16] शब्दकौस्तुभः, पृ.-142
[17] म.भा. द्रष्टव्या उद्योतटीका
[18] पा.सू.1.4.57, द्रष्टव्या तत्त्वबोधिनीटीका, पृ. 33
[19] पा.सू.1.4.57, द्रष्टव्या काशिकाटीका